# Lakshmisaubhagyavratavidhinirupanam 2

# लक्ष्मीसौभाग्यव्रतविधिनिरूपणम् २

## Document Information

Text title : Lakshmisaubhagyavratavidhinirupanam 2

File name : lakShmIsaubhAgyavratavidhinirUpaNam2.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, lakShmI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 136/51-59||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 12, 2026

*sanskritdocuments.org*

Lakshmisaubhagyavratavidhinirupanam 2

# लक्ष्मीसौभाग्यव्रतविधिनिरूपणम् २

श्रीहरिं च वसिष्ठं चाऽगस्तिं च पूजयेत्तु यः ।
आसप्तरात्रं वापि च सप्तदशसमाश्च वा ॥ ५१॥

पूजयेदर्घमप्यत्र दद्यात्तस्य क्रमात् खलु ।
भूर्लोके च भुवर्लोके स्वर्गे महसि वै जने ॥ ५२॥

तपोलोके सत्यलोके वासो भवेच्चिरं खलु ।
कल्पं कल्पं प्रभुक्त्वा स भोगान् यायात्ततोऽक्षरम् ॥ ५३॥

सप्ताऽर्घ्यकर्ता प्राप्नुयात् सप्तलोकान् समृद्धिकान् ।
"नमो लक्ष्म्यै महालक्ष्म्यै विष्णुपत्न्यै नमो नमः ॥ ५४॥

अर्घ्यं गृहाण सर्वेशि देहि सौख्यानि सर्वशः" ।
"नमो नारायणाय श्रीपतये हरये नमः ॥ ५५॥

अर्घ्यं गृहाण भगवन् देहि सौख्यानि सर्वशः" ।
"काशपुष्पप्रतीकाशावग्निमारुतसम्भवौ ॥ ५६॥

मित्रावरुणयोः पुत्रौ कुम्भयोनी नमोऽस्तु वाम्" ।
एवमर्घ्यं च पूजां च पुष्पाञ्जलिं समर्पयेत् ॥ ५७॥

तस्य लोकाः शाश्वतास्ते लक्ष्मि भवन्तु सर्वदा ।
यावदायुश्च यः कुर्यात्तस्य वासोऽक्षरे भवेत् ॥ ५८॥

इत्यर्थिता वशिष्ठेन कुम्भलक्ष्मीः प्रसूस्तदा ।
तथास्त्विति प्राह ताभ्यां शीघ्रं लीनाऽभवत् प्रसूः ॥ ५९॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे १३६-अध्यायान्तर्गतं लक्ष्मीसौभाग्यव्रतविधिनिरूपणं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय १३६/५१-५९॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 136/51-59..

Proofread by PSA Easwaran

*Lakshmisaubhagyavratavidhinirupanam 2*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*